Sadashivam
International Research Journal of Sanskrit Shastras
:: Published by ::
Shree Sadashiva Campus, Puri, Odisha
Rashtriya Sanskrit Sansthan, Deemed University under MHRD Govt. of India

चतुःषष्टिकलाः - एकमनुशीलनम्

डा. सन्तोषकुमारः जोषिः
शोधसहायकः
संस्कृतपरिषद्, उस्मानियाविश्वविद्यालयः
हैदराबाद्, तेलङ्गाणा - 500007

शोधसारांशः –

अस्माकं भारतीयसमाजे नागरिकजीवने कलाः अङ्गरूपेणावर्तन्त अधुना वर्तन्ते च। समाजे कलाकुशलानां स्त्रीपुरुषाणां गौरवः अधिकः आसीत्, इदानीमप्यस्त्येव। कलायाः मनुष्यस्य सम्बन्धः अन्तःकरणेन भवति। मनुष्यस्य हृदयगतभावना कलारुपेण बहिर्गतःभवति।

मनुष्येन मनसा शरीरेण एवं इन्द्रियैश्च क्रियमाणः मानवोपयोगि वस्तुनिर्माणं अथवा कर्म यत् भवति सा कलेति वक्तुं शक्यते। एतासां कलानां साहित्यम् अस्माकं संस्कृतवाङ्मये विस्तृततया उपलभ्यते। तादृशं साहित्यमाधारीकृत्य शोधपत्रेऽस्मिन् आदौ विद्याकलयोः भेदः, विविधकोशाधारैः कलाशब्दनिर्वचनम्, वाङ्मये कलाप्रस्तावः, विविधकलानां प्रतिपादकं साहित्यम्, कलासंख्याविचारः, शैवतन्त्रम्, वात्स्यायनकामसूत्रम्, यशोधरकृतकामसूत्रस्य जयमङ्गलव्याख्यानम्, रामचन्द्रबुधेन्द्रकृतचम्पू-रामायणव्याख्यानम्, कादम्बरीत्यादीनां ग्रन्थानाम् आधारेण चतुःषष्टिकलासु साम्यभेदनिरूपणम्, तासाम् उपयोगः इत्यादिविषयाः अत्र चर्चिष्यन्ते।

कूटसंकेतः –

संस्कृतवाङ्मये कलाः, चतुःषष्टिकलाः, कलासाहित्यम्

चतुःषष्टिकलाः - एकमनुशीलनम्

परिचयः

आर्षविज्ञानपरम्परायां प्रतिष्ठिता मानवसमाजस्य स्थितिः सर्वप्रकारेषु धर्मबद्धा, आध्यात्मिकचिन्तनशालिनी, सौख्यसाधनपरा, दुःखनिवारणनिपुणा, आनन्दप्राप्त्युपायानुसरण शीला च भवति। विज्ञानमयाः एव अस्माकं भारतसमाजे सर्वेविषयाः। मनुष्यस्य जन्म प्रभृति मरणपर्यन्तं, प्रातः काले प्रबोधनकालादरभ्य शयनपर्यन्तं निर्वर्त्यमानानि सर्वान्यपि कर्माणि विज्ञानमयान्येव भवन्ति। तादृशजीवनमेव सफलं भवति। अत एव अस्माकं व्यवस्था सुव्यवस्थिता । सुव्यवस्थितेऽस्मिन् जीवनविधाने विद्याध्ययनं विविधविषयानां ज्ञानार्जनं अत्यन्तमावश्यकं भवति। अत एव अस्माकं प्राचीनभारतीयपरम्परायां मुख्यतया अष्टादशविद्यानां, चतुःषष्टिकलानाञ्च अध्ययनम् अभ्यसनञ्चासीत् । विद्याः छात्राः विद्यालये, एवं कलाः समाजे सामाजिकाः अभ्यसन्ति स्म । यद्यत् कर्म निपुणेन मनुष्येण क्रियते तत् कर्म कला इति वक्तुं शक्यते । एताः कलाः चतुःषष्टिसंख्याकाः अस्माकं वाङ्मये प्रतिपादिताः विद्यन्ते। विद्यानाम् एवं कलानां संख्याविषये शुक्रनीतिसारकारः एवमाह -

विद्या ह्यनन्ताश्च कलाः संख्यातुं नैव शक्यते ।
विद्यामुख्याश्च द्वात्रिंशश्चतुःषष्टिकलाः स्मृताः।। [1]

केचन कलाविषयबोधकाः ग्रन्थाः ग्रथिताः। तेषाम् आधारेण कलानैपुण्येन जीवनम् आनन्दमयं कर्तुं शक्यते। अतः तेषां ज्ञानं मनुष्यस्य अत्यन्तमावश्यकं भवति। विद्या कला इति शब्दद्वयप्रयोगः अस्माभिः श्रूयते। विद्याकलयोः भेदः कः इति प्रश्नस्य समाधानत्वेन शुक्रनीतिसारकारः एवमाह – यद् वाचा यत्कर्म साध्यते सा विद्या, मूकोऽपि यत्कर्म कर्तुं शक्नोति सा कला इति ।

यद्यत्स्याद्वाचिकं सम्यक् कर्मविद्याभिसंज्ञितम् ।
शक्तो मूकोऽपि यत्कर्तुं कलासंज्ञं तत्स्मृतम् ।। [2]

कलाशब्दनिरुक्तिः

कला इति पदस्य विभिन्नकोषकाराः विभिन्नरीतिषु निर्वचनम् अददन्। कला इति शब्दः त्रिष्वर्थेषूपयुज्यमानः दृश्यते। यथा –

1. कलयति वृद्धितो धनं सङ्गृह्णाति, सञ्चिनोतीत्यर्थः कल् अच् टाप् इति कला।
2. कालमानम् त्रिंशत्काष्ठात्मकः, त्रिंशत्काष्ठाः कलाः इति सुश्रुते 6 अध्याये।
3. अंशमात्रं चन्द्रस्य कलासु षोडशांशः। शरीरांशमात्रे एवं शिल्पभेदे च इत्यादिष्वर्थेषु कला शब्दः प्रयुज्यते ।

विविधकोशेषु निर्दिष्ट कलाशब्दस्य निरुक्तिः

वैजयन्त्याम्	-	काले शिल्पे वित्तशुद्धौ चन्द्रांशे कलने कला ।[3]
मेदिन्याम्	-	कला स्यान् मूलविवृद्धौ शिल्पादावंशमात्रके । षोडशांशे च चन्द्रस्य कलनाकालमानयोः ।।[4]
अभिधानचिन्तामण्यां	-	षोडशोंशः कला चिह्नं लक्षणं लक्ष्म लाञ्छनम् ।[5]

अष्टादशनिमेषाः स्युः काष्ठा काष्टद्वयं लवः
कला तैः पञ्चदशभिर्लेशस्तद्वितयेन च ।।[6]
शिल्पं कला विज्ञानं च मालाकारिस्तु मालिकः।[7]

अनेकार्थतिलके - कला काले च चन्द्रांशे शिल्पे च कलनांशयोः।
अर्थवृद्धौ---------- [8]

नानर्थमञ्जर्याम् - कला शिल्पे कालभेदे चन्द्रांशे शकलेऽपि च ।
वित्तवृद्धौ च मूले च सुषुमाविद्ययोस्तथा ।।[9]

संस्कृतवाङ्मये कलाः

1. उपनिषदः

विभिन्नकलानाम् अथवा कलाशब्दप्रस्तावप्रसङ्गः साहित्ये बहुत्र दृश्यते। उपनिषत्सु कलाशब्दः अत्यन्तं विस्तृतार्थे उपयुक्तः दृश्यते। मुण्डक-मैत्रायणी-छान्दोग्याद्युपनिषत्सु दृश्यते। छान्दोग्योपनिषदि परब्रह्मस्वरूपनिरूपणप्रसङ्गे अस्य प्रस्तावः एवमस्ति -

प्राची दिक्कला प्रतीची दिक्कला दक्षिणादिक्कलोदीची दिक्कलैष वै सौम्यचतुष्कलःपादो ब्रह्मणः प्रकाशवान्नाम। पादो ब्रह्मणः। (4-5-2) एवं पृथिवी कला अन्तरिक्षं कला द्यौः कला समुद्रः कलैष वै सोम्यचतुष्कलः पादो ब्रह्मणोऽनन्तवान्नाम।(4-6-3)अग्निःकला सूर्यः कला चन्द्रःकला विद्युत्कलैषवै सोम्य चतुष्कलः पादो ब्रह्मणो ज्योतिष्मान्नाम (4-7-3) प्राणः कला चक्षुःकला श्रोत्रं कला मनः कलैषवै सोम्यो चतुष्कलः पादो ब्रह्मण आयतनवान्नाम(4-8-3)। एवमत्रैव षोडशकलस्सौम्यपुरुषः इति वर्णितः।[10]

2. अग्निपुराणम्

अग्निपुराणे 243 अध्यायादारभ्य 252 अध्यायपर्यन्तं ततः 328 अध्यायादारभ्य 347 अध्यायपर्यन्तं विविधकलाविषयाः प्रस्तुताः। पुरुषलक्षणम् 243 तमे अध्याये, स्त्रीलक्षणम् 244 तमे अध्याये, चामरादिलक्षणम् 245 तमे अध्याये, रत्नपरीक्षा 246 तमे अध्याये, वास्तुलक्षणम् 247 तमे अध्याये, धनुर्वेदः 249-252 तमेषु अध्यायेषु, छन्दः 328-335 तमेषु अध्यायेषु काव्यनाटकनृत्याभिनयादिविषयाः 336-347 तमेषु अध्यायेषु उक्ताः।

3. गरुडपुराणम्

गरुडपुराणे विशेषतया आचारखण्डे 63 अध्यायादारभ्य 80 अध्यायपर्यन्तं विविधकलानां विषयाः निरूपिताः सन्ति। 63,64,65 अध्यायेषु सामुद्रिकम्, 66-67 अध्याययोः स्वरोदयविशेषाः, 68 तः 80 पर्यन्तं विविधरत्नानीत्यादि विषयाः वर्णिताः।

4. श्रीमद्भागवतम्

अहोरात्रैश्चतुःषष्ट्या संयत्तौ तावतीः कलाः।
गुरुदक्षिणयाचार्यं छन्दयामासतुर्नृप ।। [11]

5. रामायणम् -

उपायज्ञाः कलाज्ञाश्च वैशिके परिनिष्ठिताः । [12]
नानाशिल्पकलाज्ञश्च भवेयुरपिपरन्तप ।[13]

6. ललितविस्तरः –

इत्येवमाद्यासु सर्वकर्मकलासु बोधिसत्व एव विशिष्यते स्म । [14]

7. **दशकुमारचरितम् -**
   चतुःषष्टिकलागमप्रयोगचतुरः ।[15]

8. **कादम्बरी -**
   पदे वाक्ये प्रमाणे--------- अन्येष्वपि कलाविशेषेषु परं कौशलमवाप ।[16]

9. **काव्यादर्शः -**
   इत्थं कलाचतुःषष्टौ विरोधस्साधु नीयताम् ।।
   तस्याः कलापरिच्छेदे रूपमाविर्भविष्यति ।। [17]

10 **रघुवंशम् -**
   गृहिणी सचिवः सखी मिथः प्रियशिष्या ललिते कलाविधौ ।
   करुणाविमुखेन मृत्युना हरता त्वां वद किं मे हृतम् ।। [18]

एवं संस्कृतवाङ्मये कलानां चर्चा विहिता दृश्यते।

कलासाहित्यम्

विभिन्नकलासाहित्यग्रन्थेषु विविधकलाः तासां सङ्ख्याः तत्तद्ग्रन्थकारैः प्रस्तुताः। तदित्थं वर्तते-

1. **कामसूत्रम्**

वात्स्यायनविरचिते कामसूत्रे मूलग्रन्थे प्रस्तुताः कलाः चतुःषष्टिः सन्ति। एवं कामसूत्रव्याख्याकारः जयमङ्गलः कामशास्त्राङ्गभूततया एवं तन्त्रावापौयिकीम् इति चतुःषष्टिकलाः द्विप्रकारतया न्यरूपयत्। प्रथमप्रकारेण प्रथमाधिकरणे तृतीयाध्याये कलाः चतुर्धा प्रोक्ताः। यथा –

1. कर्माश्रयाः कलाः 24
2. द्यूताश्रयाः कलाः 20
3. शयनोपचारिकाः कलाः 16
4. उत्तरकलाः 4 इति।

एवं कामसूत्रे साम्प्रयोगिकाधिकरणे द्वितीये पाञ्चालोक्तदिशा आलङ्गनादिभेदाः चतुःषष्टिः प्रकाराः उक्ताः।

2. **ललितविस्तरः**

ललितविस्तरे **षडशीतिकलाः** प्रतिपादिताः। तासु कलासु बोधिसत्वः विशिष्यते स्म इति ललितविस्तरे शिल्पसन्दर्शननामके द्वादशे परिवर्ते वर्णितम्।

3. **शुक्रनीतिसारः**

शुक्रनीतिसारग्रन्थे चतुर्थेऽध्याये तृतीयप्रकरणे द्वात्रिंशत् विद्याः एवं चतुःषष्टिकलाः निरूपिताः। अत्र विशेषतया विद्या कला इत्यनयोः लक्षणं, स्वरूपं भेदश्च स्पष्टं प्रतिपादितम्।

4. **शिवतत्वरत्नकारः**

बसवराजविरचिते शिवतत्त्वरत्नाकरग्रन्थे द्वितीयतरङ्गे विद्यानिरूपणप्रसङ्गे एकादशश्लोकैः चतुःषष्टिकलाः निरूपिताः। एवम् अत्रैव प्रथमतरङ्गे चतुःषष्टिकलामूलभूतानि तन्त्राणीति चतुःषष्टितन्त्रनामानि च प्रस्तुतानि।

5. **कादम्बरी**

बाणभट्टविरचिते कादम्बरीगद्यकाव्ये चन्द्रापीडविद्याध्ययनप्रसङ्गे अष्टचत्वारिंशत् कला निरूपिताः। आसु कालासु पदवाक्यप्रमाणशास्त्राण्यपि कलात्वेन स्वीकृतानि।

6. **चम्पूरामायणम्**

भोजमहाकविविरचितं चम्पूकाव्यं चम्पूरामायणम्। अस्य काव्यस्य श्रीरामचन्द्रबुधेन्द्रः विशेषव्याख्याम् अरचयत्। तद्व्याख्याने चतुःषष्टिकलाः प्रसङ्गानुरोधं प्रस्तुताः।

7. **श्रीमद्भागवतम्**

श्रीमद्भागवतमहापुरणस्य श्रीधरीयव्याख्या अत्यन्तं सुप्रसिद्धा। दशमस्कन्धे 45 तमे अध्याये 36 तमे श्लोकव्याख्याने चतुःषष्टिकलाः निरूपिताः।

8. **शिवमहिम्नस्तोत्रम्**

पुष्पदन्तविरचितं स्तोत्रं शिवमहिम्नस्तोत्रम् । अस्य स्तोत्रस्य मधुसूदनसरस्वतीस्वामिनः व्याख्याम् अरचयन्। **त्रयी सांख्यं योगः पशुपतमतं** इत्यादिश्लोकव्याख्याने चतुःषष्टिकलाः निरूपिताः।

9. **वाचस्पत्यम्**

तारनाथवाचस्पतिमहोदयेन सङ्कलिते वाचस्पत्याख्ये ग्रन्थे कलाशब्दनिर्वचनप्रसङ्गे चतुःषष्टिकलाः निरूपिताः।

10. **शब्दकल्पद्रुमः**

अत्रापि कला शब्दनिर्वचने चतुःषष्टिकलाः निरूपिताः।

11. **हलायुधकोशः**

कला शब्दनिर्वचने चतुःषष्टिकलाः निरूपिताः।

विभिन्नग्रन्थेषु कलानां संख्याविषये साम्यं वैषम्यञ्च

1.वात्सायनः 2.जयमङ्गलटीकाकारः यशोधरः 3.शैवतन्त्रम् 4.चम्पूरामायणव्याख्या, 5.कादम्बरीग्रन्थेषु कलासूच्यः वर्तन्ते । एतेषां समेषां परिशीलनेन अधो निर्दिष्टांशाः ज्ञायन्ते।

- **सर्वाः कलाः सर्वेषु ग्रन्थेषु समानाः न दृश्यन्ते।**
- **कुत्रचित् समानाः दृश्यन्ते।**
- **कुत्रचित् द्वित्राः कलाः संभूय एका कला इव दृश्यते।**
- **काश्चन कलाः विशिष्टरूपेण एकत्रैव प्रस्तुताः।**

कलाः तासां प्रस्तुतिः

सम्प्रति काः कलाः एताः कस्मिन् ग्रन्थे उल्लिखिताः इति पञ्चधा प्रदर्श्यते। यथा -1. द्वयोः ग्रन्थयोः तदधिकाना उपरितनग्रन्थानाम् उल्लिखिताः कलाः, 2. कामसूत्रे उल्लिखिताः, 3. जयमङ्गलव्याख्यायाम् उल्लिखिताः, 4. चम्पूरामायणव्याख्यायाम् उल्लिखिताः, 5. कादम्बर्याम् उल्लिखिताः इति।

अ = शिवतन्त्रम्

आ = कामसूत्रम्

इ = जयमङ्गलव्याख्या

ई = चम्पूरामायणव्याख्या

उ = कादम्बरी

1. **द्वयोः ग्रन्थयोः तदधिकाना उपरितनग्रन्थानाम् उल्लिखिताः कलाः**

अक्षरमुष्टिकाकथनम् (अ,आ)
अभिधानकोषः, अभिधानकोषच्छन्दोज्ञानम् (अ,आ)
आयुप्राप्तिः, आयुर्वेदः (इ,उ)
आलेख्यम्,(आ,अ)
इतिहासगमाद्याः, महाभारतपुराणेतिहासरामायणानि (ई,उ)
इन्द्रजालः, ऐन्द्रजालिकम् (उ,इ,आ)
उत्सादनम्, उत्सादने-संवाहने-केशमर्दने च कौशलम् (अ,आ)
उदकवाद्यम् (अ,आ)
उदकाघातः (अ,आ)
कर्णपत्रभङ्गाः (आ,अ)
कवित्वम्, काव्यक्रिया (ई,अ)
कामशास्त्रम्, रतितन्त्राणि (ई, उ)
काव्यसमस्यापूरणम् (आ,अ)
काव्यालङ्कारनाटकम्,काव्यानि,नाटकानि,आख्यायिकाः,कथाः (ई,उ)
केशमार्जन- कौशलम् (अ)
केशशेखरापीडयोजनम् (आ)
कौचुमारयोगाः, (आ,अ)
गन्धयुक्तिः, गन्धवादः (आ,अ,उ)
गायकत्वम्, नारदीयप्रभृतियोगान्धर्ववाद्यविशेषाः (ई,उ)
गीतम्म् (इ,आ,अ)
चित्रकर्म, चित्रयोगः, चित्रविधिः, (उ,आ,इ,अ)
छन्दांसि, छन्दोज्ञानम् (अ,उ)
छलव्यामोहनम्, छलितकयोगाः (इ,आ,अ)
तक्षणम् (आ,अ)
तण्डुलकुसुमवलिविकाराः (आ,अ)
तरणम्, पयसिप्लवचातुर्यम् (उ,ई)
तर्ककर्माणि (आ,अ)
तुरगंमाः, तुरङ्गवयोज्ञानम् (उ,अ)
दशनवसनाङ्गरागः (आ,अ)
दारुकरणी, दारुकर्म (ई,उ)

दुरोदरम्, नयज्ञानम्, करणादानम्, चित्राचित्रविधिः, गूढराशिः , तुल्याभिहारः क्षिप्रग्रहणम्, अनुप्राप्तिलेखास्मृतिः, अग्निक्रमः, छलव्यामोहनम्, ग्रहदानम्, उपस्थानविधिः, युद्धम्, रुतम् गतम्, नृत्तम्, पुरुषस्य भावग्रहणम् (ई,अ,उ इ)
द्यूतविशेषाः, सर्वाः द्यूतकलाः, अक्षविधानम्, रूपसंख्या, क्रियामार्गः, बीजग्रहणम्, दुर्वाचकयोगाः, दुर्वाचकयोगः (अ,आ)
देशभाषाः, देशभाषाविज्ञानम्, देशभाषाज्ञानम्, सर्वदेशभाषाः (इ,आ,अ,उ)
धातुवादः (आ,अ,ई)
धारणमातृका (आ,अ)
नृत्तम् , नाटकाख्यायिकादर्शनम्, नाट्यम् (इ,आ,अ)
नृत्यम्, भरतादिप्रणीतानिनृत्यशास्त्राणि (इ,आ,अ,उ)
नेपथ्यप्रयोगः, पट्टिकावेत्रवाणविकल्पाः (आ,अ)
पत्रछेद्यम् (उ,इ)
पानकरसरागासवयोजनम् (आ,अ)
पुरुष लक्षणम् (उ,इ)
पुष्पशकटिका, पुष्पशकटिकानिमित्तज्ञानम् (आ,अ)
पुष्पास्तरणम् (आ,अ)
पुस्तकवाचनम्, पुस्तकव्यापारः (आ,अ,उ)
प्रहेलिका (आ,अ)
मेषकुक्कुटलावकयुद्धविधिः,लावकुक्कुटमेषादियुद्धकरणकौशलं, (अ,उ,अ)
मानसी काव्यक्रिया (आ,अ)
बलकक्रीडनकानि, आकर्षक्रीडनकानि (अ,आ)
भूषणयोजनम् (आ,अ)
मणिभूमिकाकर्म (आ,अ)
मणिरागज्ञानम्, मणिरागाकरज्ञानम्, मणिसिध्दिः (अ,आ,उ)
माल्यग्रथनविकल्पाः, माल्यविधिः (आ,अ,इ)
म्लेच्छितविकल्पाः (अ,आ)
यन्त्रप्रयोगः, यन्त्रमातृका (उ.आ,अ)
रत्नपरीक्षा, रत्नशास्त्रम् रूप्यरत्नपरीक्षा (इ,उ,ई,आ,अ)
रथगतिकौशलम् ,रथचर्या (ई,उ)
लिपिकर्म, ,लेख्यकर्म (ई उ)
लिपिज्ञानम् (इ ई)

वस्त्रगोपनानि (आ,अ)
वाक्यम् , वाचकम् (उ ई)
वाद्यम् (इ,आ, अ, उ)
वास्तुविद्या (उ,आ,अ)
विशेषकौषलम्, विशेषकच्छेद्यम् (आ,इ,अ)
वीणाडमरुकवाद्यानि, वीणावेणुमुरजकांस्यतालदर्दुरपुटप्रभृतीनि वाद्यानि (आ,उ)
वृक्षायुर्वेदयोगाः, भूरुहाणां दोहदम् (आ,अ,ई)
वैजयिकीनां विद्यानां ज्ञानम्, वैतालिकीनां विद्यानां ज्ञानम्, वैनायिकीनां विद्यानां ज्ञानम् (आ,अ)
व्यायामविद्याः , व्यायामिकीनां विद्यानां ज्ञानम् (उ,आ)
शयनरचनम् (आ,अ)
शुकसारिका प्रलापनम् (आ,अ)
सम्पाट्यम् (आ,अ)
सूचीवानकर्म (आ,अ)
सूदकर्म, आस्वाद्यविधानम्, विचित्रशाकापूपभक्ष्यविकारक्रिया (ई इ आ अ)
हस्तलाघवम् (आ अ)

2. कामसूत्रे एव उल्लिखिताः कलाः

क्रियाकल्पः, निमित्तज्ञानम्, पट्टिकावेत्रावानविकल्पाः, प्रतिमाला, शेखरकापीडयोजनम्, सूत्रक्रीडा (आ)

3. जयमङ्गलव्याख्यायाम् एव उल्लिखिताः कलाः

अक्षविधानम्, अग्निक्रमः, अनुप्राप्तिलेखास्मृतिः, अनुप्रोत्सहनम्, आजीवविज्ञानम्, उपकरणक्रिया, उपस्थानविधिः, करणादानम्, क्रियामार्गः, क्रीडाकौशलम्, क्रुद्धप्रसादनम्, क्षिप्रग्रहणम्, गतं, गुह्यगूहनम्, गुह्यस्य संस्पर्शनानुलोम्यम्, गूढराशिः, ग्रहदानम्, चरमखापविधिः, चित्राचित्रविधिः, चोदनम्, तिर्यग्योनिचिकित्सितम्, तुल्याभिहारः, नखदन्तयोर्विचारौ, नयज्ञानम्, नीवीस्रंसनम्, परमार्थकौशलम्, पुनः पुनर्निरीक्षणम्, पुस्तकर्म, प्रत्यङ्गदानम्, प्रस्थितानुगमनम्, बीजग्रहणम्, मानविधिः, मायाकृतं, मृदुक्रोधप्रवर्तनम्, युद्धम्, रङ्गपरिज्ञानम्, रुतम्, रूपसंख्या, लोकज्ञानम्, वचनं, वैचक्षण्यम्, शरीरसंस्कारः, संवाहनम्, समानार्थताकृतार्थता, साश्रुपातं रमणायशापनम्, सीव्यम्, सुप्तपरित्यागः, स्वरागप्रकाशनम्, स्वाशपक्रिया, हर्षणम् (इ)

4. चम्पूरामायणव्याख्यायाम् एव उल्लिखिताः कलाः

अग्निसंस्तम्भः, अञ्जनक्रिया, अञ्जनम्, अदृश्यक्रिया, अश्मक्रिया, अश्वगतिकौशलम्, आकर्षणम्, आहवकर्म, उच्चाटनम्, औषधसिद्धिः, कालवञ्चनम्, कृषिः, खड्दसंस्तम्भः, खन्यावादः, घटिकासिद्धिः, चोरकर्म, जलस्तम्भः, जालवादः, नरदृष्टिवञ्चनम्, पादुकासिद्धिः, मन्त्रसिद्धिः, मल्लशास्त्रम्, पाशुपाल्यम्, मारणम्, मृगयारतिः, मृत्क्रिया, मृत्सिध्दिः, लोहक्रिया, वयस्तम्भः, वश्यम्, वाचस्तम्भः, वाणिज्यम्, विद्वेषणम्, वृत्रक्रिया, वेणुक्रिया, सर्वानि अपदानानि, सामुद्रिकम्, स्वरवञ्चनम्, स्वरशास्त्रम्, रसवादः, शाकुनम् (ई)

5. कादम्बर्याम् एव उल्लिखिताः कलाः

आख्यायिकाः, कथाः, चापचक्रचर्मकृपाणशक्तितोमरपरशुगदाप्रभृतयः आयुधविशेषाः, गजपृष्टानि, दन्तव्यापारः, धर्मशास्त्रम्, पदम्, प्रमाणम्, प्लुतयः, लङ्घनम्, राजनीतयः,विषापहरणम्, शकुनिरुतज्ञानम्, सर्वशिल्पानि, सर्वसंज्ञाः, सुरङ्गोपभेदः, हस्तिशिक्षा (उ)

उपसंहारः

कलाः मानवस्य सर्वदा सुखानन्दान् कल्पयन्ति। एताः कलाः आ बहोः कालात् पूर्वमेव अस्माकं विद्याध्ययनेन अथवा सामन्यजीवनेन साकं जनाः अभ्यसन्ति स्म। ताभिः आनन्दम् अनुभवन्ति स्म, इदानीमपि अनुभवन्त्येव। कलाः न केवलम् आनन्ददायकाः, अपि च जीवनदायकाश्च भवन्ति। कृषिरेका कला। कृषिकार्येणैव जगति अन्नं लभते। एवं शिल्पकर्म, नृत्यं, गीतं, चित्रं, सीवनं, पाशुपाल्यं, वेणुक्रिया, क्षौरकर्मा इत्यादिकलाः नैपुण्येन अभ्यस्य जनाः जीवनभृतिं प्राप्नुवन्ति स्म। एवं प्लवने अन्ताराष्ट्रियस्तरे विविधस्पर्धाः आयोज्यन्ते तस्मिन् नैपुण्येन धनम् एवं यशः प्राप्तुं शक्यते। सूदकर्मकलाद्वारा इदानीं विभिन्नरीतिषु अट्टशालासु एवं क्याटरिंग् इत्यादिरूपेण बहवः जनाः जीवनं यापयन्ति। अस्माकं महर्षयः कासाञ्चन कलानां विशिष्टरूपेण शास्त्राण्येव अरचयन्। तेषु शास्त्रेषु विविधकलानैपुण्यानि रहस्यानि च तत्र बोधितानि। नृत्यविषये नाट्यशास्त्रं, गीतविषये सङ्गीतसम्बद्धानि शास्त्राणि, स्त्रीपुरषलक्षणप्रतिपादकं शास्त्रं सामुद्रिकम्, अश्वचालनायवश्यकं विज्ञानाबोधकं शास्त्रं अश्वहृदयं, इत्येवं प्रकारेण संस्कृतवाङ्मये बहवः लभ्यन्ते। अतः एतेषां साहाय्येन आवश्यकं नैपुण्यं तासु तासु कलासु प्राप्य आधुनिकप्राविधिकज्ञानं, प्राचीनामूल्यविज्ञानेन साकं मेलयित्वा इतोऽपि निर्वर्त्यमानेषु तत्तत् कर्मसु अभिवृद्धिं जीवने प्रतिक्षणम् आनन्दं प्राप्य मनुष्यस्य मुख्यं लक्ष्यं मोक्षं प्राप्तुम् अवश्यं सर्वैः मनुष्यैः कलाः अभ्यसनीयाः उपास्याश्चेति शम्।।

उपयुक्तग्रन्थसूची

- अग्निपुराणम् – आनन्दाश्रमग्रन्थावलिः- 1987
- अनेकार्थतिलकः- पूना- 1947
- अभिधानचिन्तामणिः-जिनेन्द्रमुनिविरचितः- निर्णयसागर्- 1956
- कादम्बरी – पंडित पुस्तकालय-काशी
- कामसूत्रम् - चौखम्बा संस्कृतसीरिस् -1929

- कामसूत्रम् -निर्णय् सागर्- 1900
- काव्यादर्शः- पुल्लेल श्रीरामचन्द्रः –आन्ध्रप्रदेशसाहित्यअकाडमी- हैदराबाद्
- गरुडपुराणम् - आचारखण्डःन्यू भारतीय बुक् कार्पोरेषन्- देल्ही- 2007
- नानार्थमञ्जरी-पूना-1954
- रघुवंशम् – चौखम्बा ओरयण्टालिया- वारणासी- 1987
- ललितविस्तरः-मिथिलाविद्यापीठम् -1987
- वाचस्पत्यम् -
- वैजयन्तीकोशः- 1893
- शब्दकल्पद्रुमः-
- शिवतत्वरत्नाकरः-भसवराजः- प्राच्यविद्यासंशोधनालयः- 1969
- शिवमहिम्नस्तोत्रम् – वाविल्लरामसास्त्रुल्लु आण्ड् सन्स्
- शुक्रनीतिसारः- साहितीसन्मानसमिति 2002
- श्रीमद्भागवतम् -श्रीधरीयव्याख्या
- हलायुधकोशः-हिन्दीसमिति -1957

पादटिप्पण्यः

1 .शुक्रनीतिसारः 4-3-23

2 .शुक्रनीतिसारः 4-3-24

3. वैजयन्तीकोशः पृष्टसंख्या 220 स्त्रीलिङ्गाध्यायः

4 मेदिनीकोशः लान्तवर्गःश्लोकः 5

5 अभिधानचिन्तामणिः श्लोकसंख्या 20 पृष्टसंख्या 19

6 अभिधानचिन्तामणिः श्लोकसंख्या 50 पृष्टसंख्या 24

7 अभिधानचिन्तामणिः श्लोकसंख्या 563 पृष्टसंख्या 154

8 अनेकार्थतिलकः- 2-65

9 नानार्थमञ्जरी 1620

10 छान्दोग्योपनिषत् 6 प्रापठकः सप्तमखण्डः 1

11 श्रीमद्भागवतम् 10-45-36

12 रामायणम् 1-9-8

13 रामायणम् बालकाण्डः

14 ललितविस्तरः-शिल्पसन्दर्शनपरिवर्तः, द्वादशः

15 दशकुमारचरितम्

16 कादम्बरी

17 काव्यादर्शः 3-171

18 रघुवंशम् 8-67